This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M 1996. विषय महाभारत

नाव. स्वर्गारोहणपर्व (MSS)

लेखक/लिपीकार शंकर पंडित

पृष्ठ 10 काल शके 1630 पूर्ण/~~अपूर्ण~~

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ स्वर्गारोहणपर्वेदं ॥ छ ॥

M 1996

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स्व०
१

श्रीगणेशायनमः॥ ॥नारायणंनमस्कृत्यनरंचैवनरोत्तमं।देवींसरस्वतींचैवततोजयमुदीरयेत्॥ ॥जन
मेजयउवाच॥ ॥स्वर्गंत्रिविष्टपंप्राप्यममपूर्वपितामहाः।पांडवाधार्तराष्ट्राश्चकानिस्थानानिभेजिरे।एत
दिच्छाम्यहंश्रोतुंसर्वविज्ञास्मिमेमतः।महर्षिणाभ्यनुज्ञातोव्यासेनाद्भुतकर्मणा॥ ॥वैशंपा॥ ॥स्वर्गंत्रि
विष्टपंप्राप्यतवपूर्वपितामहाः।युधिष्ठिरप्रभृतयोयदकुर्वंततच्छृणु।स्वर्गंत्रिविष्टपंप्राप्यधर्मराजोयुधि
ष्ठिरः।दुर्योधनंश्रियाजुष्टंददर्शासीनमासने।भ्राजमानमिवादित्यंवीरलक्ष्म्याभिसंवृतं।देवैर्भ्राजिष्णु
भिःसाध्यैःसहितंपुण्यकर्मभिः।ततोयुधिष्ठिरोराजादुर्योधनममर्षितः।सहसासन्निवृत्तोभूच्छ्रियंदृष्ट्वा
सुयोधने।ब्रुवन्नुच्चैस्तरांतान्वैनाहंदुर्योधनेनवै।सहितःकामयेलोकान्लुब्धेनादीर्घदर्शिना।यत्कृतेपृ
थिवीसर्वासुहृदोबांधवास्तथा।हतास्माभिःप्रसह्याजौक्लिष्टैःपूर्वमहावने।द्रौपदीचसभामध्येपांचाली राम
धर्मचारिणी।परिक्लिष्टानवद्यांगीपत्नीनोगुरुसन्निधौ।अस्तिदेवानमेकामःसुयोधनमुदीक्षितुं।त १

त्राहंगंतुमिच्छामियत्रतेभ्रातरोमम।नैवमित्यब्रवीत्तंतुनारदःप्रहसन्निव।स्वर्गेनिवासेराजेंद्रविरुद्धंचापिन
श्यति।युधिष्ठिरमहाबाहोमैवंवोचःकथंचन।दुर्योधनंप्रतिनृपंशृणुचेदंवचोमम।एषदुर्योधनोराजापू
ज्यतेत्रिदशैःसह।सद्भिश्चराजप्रवरैर्यइमेस्वर्गवासिनः।वीरलोकगतिंप्राप्तोयुद्धेहुत्वात्मनस्तनुं।यूयंस
र्वेसुरसमाःसदेवाननहिंसिताः।सएवक्षत्रधर्मेणस्थानमेतदवाप्तवान्।भयेमहतियोभीतोबभूवपृ
थिवीपतिः।नतन्मनसिकर्तव्यंपुत्रयद्यूतकारितं।द्रौपद्याश्चपरिक्लेशंनचिंतयितुमर्हसि।येचान्येपिपरि
क्लेशायुष्माकंज्ञातिकारिताः।संग्रामेष्वथवान्यत्रनतान्संस्मर्तुमर्हसि।समागच्छयथान्यायंराज्ञादुर्योध
नेनवै।स्वर्गोयंनेहवैराणिभवंतिमनुजाधिप।नारदेनैवमुक्तस्तुकुरुराजोयुधिष्ठिरः।भ्रातॄन्पप्रच्छमेधा
वीवाक्यमेतदुवाचह।यदिदुर्योधनस्यैतेवीरलोकाःसनातनाः।अधर्मज्ञस्यपापस्यपृथिवीसुहृद्द्रुहः।
यत्कृतेपृथिवीनष्टासहयाःसनरद्विपाः।वयंचमन्युनादग्धावैरंप्रतिचिकीर्षवः।येतेवीरामहात्मानोभ्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्वर्गा०
२

तरोमेमहाव्रताः। सत्यप्रतिज्ञालोकस्य शूरावैसत्यवादिनः। तेषामिदानींकेलोकाद्रष्टुमिच्छामितानहं। कर्णंचैव
महात्मानंकौंतेयंसत्यसंगरं। धृष्टद्युम्नंसात्यकिंचधृष्टद्युम्नस्यचात्मजान्। येचशस्त्रैर्वधंप्राप्ताः क्षत्रधर्मेण
पार्थिवाः। क्वनुतेपार्थिवाब्रह्मन्नेतान्नपश्यामिनारद। विराटद्रुपदौचैवधृष्टकेतुमुखांश्चतान्। शिखंडिनं
तुपांचाल्यंद्रौपदेयांश्चसर्वशः। अभिमन्युंचदुर्धर्षंद्रष्टुमिच्छामिनारद॥ ॥इतिश्रीमहाभारतेस्वर्गारोहणप
र्वणि॥ ॥युधिष्ठिरउ०॥ ॥नेहपश्यामिविबुधाराधेयममितौजसं। भ्रातरौचमहात्मानौयुधामन्यूत्तमौज
सौ। जुहुवुर्येशरीराणिरणवह्नौमहारथाः। राजानोराजपुत्राश्चयेमदर्थेहतारणे। क्वतेमहारथाःसर्वेशा
र्दूलसमविक्रमाः। तैरप्ययंजितोलोकः कच्चित्पुरुषसत्तमैः। यदिलोकानिमान्प्राप्तास्तेचसर्वेमहारथाः। स्थि
तंवित्तहिमांदेवाःसहितंतैर्महात्मभिः। कच्चिन्नतैरवाप्तोयंनृपैर्लोकोक्षयःशुभः। नतैरहंविनारंस्येभ्रा
तृभिर्ज्ञातिभिस्तथा। मातुर्हिवचनंश्रुत्वातदासलिलकर्मणि। कर्णस्यक्रियतांतोयमितितप्यामितेनवै

राम
२

इदंचपरितप्यामिपुनःपुनरहंसुराः। यन्मातुःसदृशौपादौतस्याहममितात्मनः। दृष्ट्वैवतौनानुगतःकर्णंपरबल
र्दनं। नह्यस्मान्कर्णसहितान्जयेच्छक्रोपिसंयुगे। तमहंयत्रतत्रस्थंद्रष्टुमिच्छामिसूर्यजं। अविज्ञातोमयायोसौ
घातितःस× न× व्यसाचिना। भीमंचभीमविक्रांतंप्राणेभ्योपिप्रियंमम। अर्जुनंचेंद्रसंकाशंयमौचैवयमोपमौ।
द्रष्टुमिच्छामितांचाहंपांचालींधर्मचारिणीं। नचेहस्थातुमिच्छामिसत्यमेवंब्रवीमिवः। किंमेभ्रातृविहीनस्यस्व
र्गेणासुरसत्तमाः। यत्रतेममसस्वर्गोनायंस्वर्गोमतोमम॥ ॥देवाऊचुः॥ ॥यदिवैतत्रतेश्रद्धागम्यतांपुत्रमा
चिरं। प्रियेहितववर्तामोदेवराजस्यशासनात्॥ ॥वैशं०॥ ॥इत्युक्त्वातंततोदेवादेवदूतमुपादिशन्। युधि
ष्ठिरस्यसुहृदोदर्शयेतिपरंतप। ततःकुंतीसुतोराजादेवदूतश्चजग्मतुः। सहितौराजशार्दूलयत्रतेपुरुषर्षभा
ः। अग्रतोदेवदूतस्तुययौराजाचपृष्ठतः। पंथानमशुभंदुर्गंसेवितंपापकर्मभिः। तमसासंवृतंघोरंकेशशैव
लशाद्वलं। युक्तंपापकृतांगंधैर्मांसशोणितकर्दमं। दंशोत्पातकभल्लूकमक्षिकामशकावृतं। इतश्चेतश्चकुण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्व० ३

पेतं समंतात्परिवारितं। अस्थिकेशसमाकीर्णं कृमिकीटसमाकुलं। ज्वलनेन प्रदीप्तेन समंतात्परिवेष्टितं। अयो
मुखैश्च काकाद्यैर्गृध्रैश्च समभिद्रुतं। सूचीमुखैस्तथा प्रेतैर्विंध्यशैलोपमैर्वृतं। मेदोरुधिरयुक्तैश्च छिन्नबाहूरु
पाणिभिः। निकृत्तोदरपादैश्च तत्रतत्र प्रवेरितैः। स तत्कुणपदुर्गंधमशिवं लोमहर्षणं। जगाम राजा धर्मात्मा म
ध्ये बहु विचिंतयन्। ददर्शोष्णोदकैः कीर्णां नदीं चापि सुदुर्गमां। असिपत्रवनं चैव निशितक्षुरसंवृतं। करं
भवालुकास्तप्ता आयसीश्च शिलाः पृथक्। लोहकुंभीश्च तैलस्य क्वाथ्यमानाः समंततः। कूटशाल्मलिकं चा
पि दुःस्पर्शं तीक्ष्णकंटकं। ददर्श चापि कौंतेयो यातनाः पापकर्मिणां। स तं दुर्गंधमालक्ष्य देवदूतमुवाच ह। कि
यदध्वानमस्माभिर्गंतव्यमिममीदृशं। क्व च ते भ्रातरो मह्यं तन्ममाख्यातुमर्हसि। देशोऽयं कश्च देवानामेत राम ३
दिच्छामि वेदितुं। स संनिववृते श्रुत्वा धर्मराजस्य भाषितं। देवदूतोऽब्रवीच्चैनमेतावद्गमनं तव। निवर्तितव्यो हि
मया यथास्म्युक्तो दिवौकसैः। यदि श्रांतोसि राजेंद्र त्वमथागंतुमर्हसि। युधिष्ठिरस्तु निर्विण्णस्तेन गंधेन मूर्छि

तः। निवर्तने धृतमनाः पर्यावर्तत भारत। स सन्निवृत्तो धर्मात्मा दुःखशोकसमाहतः। शुश्राव तत्र वदतां दीना वाचः
समंततः। भो भो धर्मज राजर्षे पुण्याभिजन पांडव। अनुग्रहार्थमस्माकं तिष्ठ तावन्मुहूर्तकं। आयाति त्वयि दुर्धर्षे वाति
पुण्यः समीरणः। तव गंधानुगस्तात येनास्मान्सुखमागमत्। ते वयं पार्थ दीर्घस्य कालस्य पुरुषर्षभ। सुखमासा
दयिष्यामस्त्वां दृष्ट्वा राजसत्तम। संतिष्ठस्व महाबाहो मुहूर्तमपि भारत। त्वयि तिष्ठति कौरव्य यातनास्मान्न बाधते।
एवं बहुविधा वाचः कृपणा वेदनावतां। तस्मिन्देशे स शुश्राव समंताद्वदतां नृप। तेषां तु वचनं श्रुत्वा दयावान्दीन
भाषिणां। अहो कृच्छ्रमिति प्राह तस्थौ स च युधिष्ठिरः। स ता गिरः पुरस्ताद्वै श्रुतपूर्वाः पुनः पुनः। ग्लानानां दुःखितानां
च नाभ्यजानत पांडवः। अबुध्यमानस्ता वाचो धर्मपुत्रो युधिष्ठिरः। उवाच के भवंतो वै किमर्थमिह तिष्ठत। इत्यु
क्तास्ते ततः सर्वे समंतादवभाषिरे। कर्णोहं भीमसेनोहमर्जुनोहमिति प्रभो। नकुलः सहदेवोहं धृष्टद्युम्नोह
मित्युत। द्रौपदी द्रौपदेयाश्च इत्येवं ते विचुक्रुशुः। ता वाचः स तदा श्रुत्वा तद्देशसदृशीर्नृप। ततो विममृशे राजा किं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्व०
४

लिदंदैवकारितं। किंनुतत्कलुषंकर्मकृतमेभिर्महात्मभिः। कर्णेनद्रौपदेयैर्वापांचाल्यावासुमध्यया। यइमेपापगं
धेस्मिन्देशेसंतिसुदारुणे। नाहंजानामिसर्वेषांदुष्कृतंपुण्यकर्मणां। किंकृत्वाधृतराष्ट्रस्यपुत्रोराजासुयोधनः। त
थाश्रियायुतःपापैःसहसर्वैःपदानुगैः। महेंद्रइवलक्ष्मीवानास्तेपरमपूजितः। कस्येदानींविकारोयंयइमेनरकंग
ताः। सर्वधर्मविदःशूराःसत्यागमपरायणाः। क्षत्रधर्मपराःसंतोयज्वानोभूरिदक्षिणाः। किन्नुसुप्तोस्मिजाग
र्मिचिंतयामिनचेतये। अहोचित्तविकारोयंस्याद्वामेचित्तविभ्रमः। एवंबहुविधंराजाविममर्शयुधिष्ठिरः। दुः
खशोकसमाविष्टश्चिंताव्याकुलितेंद्रियः। क्रोधमाहारयच्चैवतीव्रंधर्मसुतोनृपः। देवांश्चगर्हयामासधर्मंचैव
युधिष्ठिरः। सतीव्रगंधसंतप्तोदेवदूतमुवाचह। गम्यतांतत्रयेषांत्वंदूतस्तेषामुपांतिकं। नह्यहंतत्रयास्यामिस्थि
तोस्मीतिनिवेद्यतां। मत्संश्रयादिमेदूताःसुखिनोभ्रातरोहिमे। इत्युक्तःसतदादूतःपांडुपुत्रेणधीमता। जगाम राम
तत्रयत्रास्तेदेवराजःशतक्रतुः। निवेदयामाससचतद्देवराजचिकीर्षितं। यथोक्तंधर्मपुत्रेणसर्वमेवजनाधिप॥ ४

॥ ॥इतिश्रीमहाभारतेस्वर्गारोहणपर्वणि॥ ॥वैशंपा॥ ॥स्थितेमुहूर्तंपार्थेतुधर्मराजेयुधिष्ठिरे। आजग्मुस्तत्र
कौरव्यदेवाःशक्रपुरोगमाः। सत्वेवियद्वपुर्वान्धर्मोराजानंप्रसमीक्षितुं। तत्राजगामयत्रासौकुरुराजोयुधिष्ठिरः। ते
षुभास्वरदेहेषुपुण्याभिजनकर्मसु। समागतेषुदेवेषुव्यगमत्तत्तमोनृप। नादृश्यंतचतास्तत्रयातनाःपापकर्मिणां।
नदीवैतरणीचैवकूटशाल्मलिनासह। लोहकुंभ्यःशिलाश्चैवनादृश्यंतभयानकाः। विकृतानिशरीराणियानितत्रस
मंततः। ददर्शराजाकौरव्यस्तान्यदृश्यानिचाभवन्। ततोवायुःसुखस्पर्शःपुण्यगंधवहःशुचिः। ववौदेवसमीपस्थः
शीतलोतीवभारत। मरुतःसहशक्रेणवसवश्चाश्विनासह। साध्यारुद्रास्तथादित्यायेचान्येपिदिवौकसः। सर्वेत
त्रसमाजग्मुःसिद्धाश्चपरमर्षयः। यत्रराजामहातेजाधर्मपुत्रस्थितोभवत्। ततःशक्रःसुरपतिःश्रियापरमयायुतः। यु
धिष्ठिरमुवाचेदंसांत्वपूर्वमिदंवचः। युधिष्ठिरमहाबाहोप्रीतादेवगणास्तव। एह्येहिपुरुषव्याघ्रकृतमेतावताविभो।
सिद्धिःप्राप्तामहाबाहोलोकाश्चाप्यक्षयास्तव। नचमन्युस्त्वयाकार्यःशृणुचेदंवचोमम। अवश्यंनरकस्तावद्द्रष्टव्यःस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स्व०
५

र्वराजभिः। शुभानामशुभानांच द्वौराशी पुरुषर्षभ। यः पूर्वं सुकृतं भुंक्ते पश्चान्निरयमेव सः। पूर्वं नरकभाग्यस्तु पश्चा
त्स्वर्गमुपैति सः। भूयिष्ठं पापकर्मा यः स पूर्वं स्वर्गमश्नुते। तेन त्वमेवं गमितो मया श्रेयोर्थिना नृप। व्याजेन हि त्वया
द्रोणउपचीर्णः सुतं प्रति। व्याजेनैव ततो राजन्दर्शितो नरकस्तव। यथैव त्वं तथा भीमस्तथा पार्थो यमौ तथा।
द्रौपदी च तथा कृष्णा व्याजेन नरकं गताः। आगच्छ नरशार्दूल मुक्तास्ते चैव कल्मषात्। स्वपक्षाश्चैव ये तुभ्यं पार्थि
वा निहता रणे। सर्वे स्वर्गमनुप्राप्तास्तान्पश्य भरतर्षभ। कर्णश्चैव महेष्वासः सर्वशस्त्रभृतां वरः। स गतः परमां
सिद्धिं यदर्थमिह तप्यसे। तं पश्य पुरुषव्याघ्रमादित्यतनयं विभो। स्वस्थानस्थं महाबाहो जहि शोकं नरर्षभ। भ्रा
तॄंश्चान्यांस्तथा पश्य स्वपक्षांश्चैव पार्थिवान्। स्वं स्वं स्थानमनुप्राप्तान्व्येतु ते मानसो ज्वरः। कृच्छ्रं पूर्वं चानुभूय
इतः प्रभृति कौरव। विहरस्व मया सार्द्धं गतशोको निरामयः। कर्मणां तात पुण्यानां जितानां तपसा स्वयं। दाना
नां च महाबाहो फलं प्राप्नुहि पार्थिव। अद्य त्वां देवगंधर्वा दिव्याश्चाप्सरसो दिवि। उपसेवंतु कल्याणा विरजोंब

राम
५

रभूषणाः। राजसूयजितान्लोकान्स्वयमेवाभिवर्द्धितान्। प्राप्नुहि त्वं महाबाहो तपसश्च महाफलं। उपर्युपरि
राज्ञां हि तव लोका युधिष्ठिर। हरिश्चंद्रसमः पार्थ येषु त्वं विहरिष्यसि। मांधाता यत्र राजर्षिर्यत्र राजा भगीरथः। दौ
ष्यंतिर्यत्र भरतस्तत्र त्वं विहरिष्यसि। एषा देवनदी पुण्या पार्थ त्रैलोक्यपावनी। आकाशगंगा राजेंद्र तत्राप्लुत्य
गमिष्यसि। अत्र स्नातस्य भावस्ते मानुषो विगमिष्यति। गतशोको निरायासो मुक्तवैरो भविष्यसि। एवं ब्रुव
ति देवेंद्रे राजेंद्रं वै युधिष्ठिरं। धर्मो विग्रहवान्साक्षादुवाच सुतमात्मनः। भो भो राजन्महाप्राज्ञ प्रीतोस्मि तव पु
त्रक। मद्भक्त्या सत्यवाक्येन क्षमया च दमेन च। एषा तृतीया जिज्ञासा तव राजन्कृता मया। न शक्यसे चाल
यितुं स्वभावात्पार्थ हेतुतः। पूर्वं परीक्षितो हि त्वं प्रश्नाद्वैतवने मया। अरणीसहितस्यार्थे तच्च निस्तीर्णवानसि
सोदर्येषु विनष्टेषु द्रौपद्यां तत्र भारत। श्वरूपधारिणा पुत्र पुनस्त्वं मे परीक्षितः। इदं तृतीयं भ्रातॄणामर्थे य
त्स्थातुमिच्छसि। विशुद्धोसि महाभाग सुखी विगतकल्मषः। न च ते भ्रातरः पार्थ नरकार्हा विशांपते। मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्व०
६

येषांदेवराजेनमहेंद्रेपार्थयोजिता।अवश्यंनरकास्तातद्रष्टव्याःसर्वराजभिः।ततस्त्वयाप्राप्तमिदंमुहूर्तंदुःखमु
त्तमं।नसव्यसाचीभीमोवायमौवापुरुषर्षभौ।कर्णोवासत्यवाक्शूरोनरकार्हाश्चिरंनृप।नकृष्णाराजपुत्रीअन
रकार्हायुधिष्ठिर।एह्येहिभरतश्रेष्ठपश्यगंगांत्रिलोकगां।एवमुक्तःसराजर्षिस्तवपूर्वपितामहः।जगामस
हधर्मेणसर्वैश्चत्रिदिवालयैः।गंगांदेवनदींपुण्यांपावनीमृषिसंस्तुतां।अवगाह्यततोराजातनुंतत्याजमा
नुषीं।ततोदिव्यवपुर्भूत्वाधर्मराजोयुधिष्ठिरः।निर्वैरोगतसंतापोजलेतस्मिन्समाप्लुतः।ततोवृतोययौदेवैः
कुरुराजोयुधिष्ठिरः।धर्मेणसहितोधीमान्स्तूयमानोमहर्षिभिः।यत्रतेपुरुषव्याघ्राःशूराविगतमन्य
वः।पांडवाधार्तराष्ट्राश्चस्वानिस्थानानिभेजिरे॥ ॥इतिमहाभारतेस्वर्गारोहणपापर्वणि॥ ॥वैराम्॥ ॥
ततोयुधिष्ठिरोराजादेवैःसर्षिमरुद्गणैः।स्तूयमानोययौतत्रयत्रतेकुरुपुंगवाः।ददर्शतत्रगोविंदंब्राह्मे
णवपुषान्वितं।तेनैवदृष्टपूर्वेणसादृश्येनैवसूचितं।दीप्यमानंस्ववपुषादिव्यैरस्त्रैरुपस्थितं।चक्रप्रभृ

राम
६

तिभिर्घोरैर्दिव्यैःपुरुषविग्रहैः।उपास्यमानंवीरेणफाल्गुनेनसुवर्चसा।तथास्वरूपंकौंतेयोददर्शमधुसूदनं।तावुभौ
पुरुषव्याघ्रौसमुदीक्ष्ययुधिष्ठिरं।यथावत्प्रतिपेदातेपूजयादेवपूजितौ।अपरस्मिन्नथोद्देशेकर्णंशस्त्रभृतांवरं।
द्वादशादित्यसहितंददर्शकुरुनंदनः।अथापरस्मिन्नुद्देशेमरुद्गणवृतंविभुं।भीमसेनमथापश्यत्तेनैववपुषा
न्वितं।वायोर्मूर्तिमतःपार्श्वेदिव्यमूर्तिसमन्वितं।श्रियापरमयायुक्तंसिद्धिंपारमिकांगतं।अश्विनोस्तुतथा
स्थानेदीप्यमानौस्वतेजसा।नकुलंसहदेवंचददर्शकुरुनंदनः।तथाददर्शपांचालींकमलोत्पलमालिनीं।वपु
षास्वर्गमाक्रम्यतिष्ठंतीमर्कवर्चसं।अखिलंसहसाराजाप्रष्टुमैच्छद्युधिष्ठिरः।ततोस्यभगवानिंद्रःकथयामा
सदेवराट्।श्रीरेषाद्रौपदीरूपात्वदर्थेमानुषंगता।अयोनिजालोककांतापुण्यगंधायुधिष्ठिर।रत्यर्थंभवतांह्ये
षांनिर्मिताशूलपाणिना।द्रुपदस्यकुलेजाताभवद्भिश्चोपजीविता।एतेपंचमहाभागागंधर्वाःपावकप्रभाः।द्रौ
पद्यास्तनयाराजन्युष्माकममितौजसः।पश्यगंधर्वराजानंधृतराष्ट्रंमनीषिणं।एनंचत्वंविजानीहिभ्रात
रंपूर्वजंपितुः।अयंतेपूर्वजोभ्राताकौंतेयःपावकद्युतिः।सूर्यपुत्रोग्रजःश्रेष्ठोराधेयइतिविश्रुतः।आदित्यस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्व०
७

द्वितीयामिपश्येनंपुरुषर्षभं।साध्यानामथदेवानांविश्वेषांमरुतामपि।गणेषुपश्यराजेंद्रवृष्ण्यंधकमहारथान्।सात्य
किप्रमुखान्वीरान्भोजांश्चैवमहाबलान्।सोमेनसहितंपश्यसौभद्रमपराजितं।अभिमन्युंमहेष्वासंनिशाकरसम
द्युतिं।एषपांडुर्महाबाहुःकुंत्यामाद्र्याचसंगतः।विमानेनसदाभ्येतिपितातवममांतिकं।वसुभिःसहितंपश्यभीष्मं
शांतनवंनृप।द्रोणंबृहस्पतेःपार्श्वेगुरुमेनंनिशामय।एतेचान्येमहीपालायोधास्तवचपांडव।गंधर्वसहितायां
तियक्षपुण्यजनैस्तथा।गुह्यकानांगतिंप्राप्ताःकेचिच्चापिनराधिपाः।त्यक्त्वादेहंजितःस्वर्गःपुण्यवाग्बुद्धिकर्मभिः
॥ ॥इतिमहाभारतेस्वर्गारोहणपर्वणि॥ ॥जनमे०॥ ॥भीष्मद्रोणौमहात्मानौधृतराष्ट्रश्चपार्थिवः।विराटद्रुप
दौचोभौशंखश्चैवोत्तरस्तथा।धृष्टकेतुर्जयत्सेनोराजाचैवससत्यजित्।दुर्योधनसुताश्चैवशकुनिश्चैवसौबलः।
कर्णपुत्राश्चविक्रांताराजाचैवजयद्रथः।घटोत्कचादयश्चैवयेचान्येनानुकीर्तिताः।येचान्येकीर्तितावीराराजानोद
समूर्तयः।स्वर्गेकालंकियंतंतेतस्थुस्तदपिशंसमे।आहोस्विच्छाश्वतंस्थानंतेषांतत्रद्विजोत्तम।अंतेवाकर्मणांकां
तेगतिंप्राप्तानरर्षभाः।एतदिच्छाम्यहंश्रोतुंप्रोच्यमानंद्विजोत्तम।तपसाहिप्रदीप्तेनसर्वंत्वमनुपश्यसि॥ ॥

राम
७

॥ ॥सौतिरु०॥ ॥इत्युक्तःसतुविप्रर्षिरनुज्ञातोमहात्मना।व्यासेनतस्यनृपतेराख्यातुमुपचक्रमे॥ ॥वैशंपा०॥ ॥गंतव्यंकर्मणा
मंतेसर्वेषामनुजाधिप।श्रृणुगुह्यमिदंराजन्देवानांभरतसत्तम।यदुवाचमहातेजा
दिव्यचक्षुःप्रतापवान्।मुनिःपुराणःकौरव्यपाराशर्योमहाव्रतः।अगाधबुद्धिःसर्वज्ञोगतिज्ञःसर्वकर्मणां।वसूनेवमहा
तेजाभीष्मःप्रापमहामतिः।अष्टावेवहिदृश्यंतेवसवोभरतर्षभ।बृहस्पतिंविवेशाथद्रोणोह्यंगिरसांवरं।कृतवर्मा
तुहार्दिक्यःप्रविवेशमरुद्गणान्।सनत्कुमारंप्रद्युम्नःप्रविवेशयथागतं।धृतराष्ट्रोधनेशस्यलोकान्प्रापदुरासदान्।
धृतराष्ट्रेणसहितागांधारीचयशस्विनी।पत्नीभ्यांसहितःपांडुर्महेंद्रभवनंययौ।विराटद्रुपदौचोभौधृष्टकेतुश्चपार्थि
वः।निशठाक्रूरसांबश्चभानुःकंपोविदूरथः।भूरिश्रवाःशलश्चैवभूरिश्चपृथिवीपतिः।कंसश्चैवोग्रसेनश्चवसुदेवस्त
थैवच।उत्तरश्चसहभ्रात्राशंखेननरपुंगवः।विश्वेषांदेवतानांतेविविशुर्नरपुंगवाः।वर्चानाममहातेजाःसोमपुत्रःप्र
तापवान्।सोभिमन्युर्नृसिंहस्यफाल्गुनस्यसुतोभवत्।सयुध्वाक्षत्रधर्मेणयथानान्यःपुमान्क्वचित्।विवेशसोमं
धर्मात्माकर्मणोंतेमहारथः।आविवेशरविंकर्णःनिहतःपुरुषर्षभ।द्वापरंशकुनिःप्रापधृष्टद्युम्नस्तुपावकं।धृत
राष्ट्रात्मजाःसर्वेयातुधानाबलोत्कटाः।ऋद्धिमंतोमहात्मानःशस्त्रपूतादिवंगताः।धर्ममेवाविशत्क्षत्ताराजाचैवयु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिष्ठिरः। अनंतो भगवान्देवः प्रविवेश रसातलं। पितामहनियोगाद्धि योयोगाद्गामधारयत्। यः सनारायणोनामदेव
देवः सनातनः। तस्यांशोवासुदेवस्तु कर्मणोंतेविवेशह। षोडशस्त्रीसहस्राणिवासुदेवपरिग्रहः। अमज्जंस्ताः
सरस्वत्यां कालेन जनमेजय। तत्रत्यक्त्वाशरीराणि दिवमाकरुरुः पुनः। ताश्चैवाप्सरसो भूत्वा वासुदेवमुपागम
न्। हतास्तस्मिन्महायुद्धेयेवीरास्तु महारथाः। घटोत्कचादयश्चैव देवान्यक्षांश्च भेजिरे। दुर्योधनसहायाश्च राक्ष
साः परिकीर्तिताः। प्राप्तास्तक्रमशोराजन्सर्वलोकाननुत्तमान्। भवनंचमहेंद्रस्य कुबेरस्यच धीमतः। वरुणस्य
तथालोकान्विविशुः पुरुषर्षभाः। एतत्तेसर्वमाख्यातं विस्तरेण महाद्युते। कुरूणांचरितंकृत्स्नं पांडवानांच भा
रत॥ ॥सौतिरुवाच॥ ॥एतच्छ्रुत्वा द्विजश्रेष्ठाः सराजा जनमेजयः। विस्मितोभवदत्यर्थं यज्ञकर्मांतरेष्वथ। ततः
समापयामासुः कर्मतत्तस्ययाजकाः। आस्तीकश्चाभवत्प्रीतः परिमोक्ष्य भुजंगमान्। ततोद्विजांश्चतान्सर्वान्
दक्षिणाभिरतोषयत्। पूजिताश्चापितेराज्ञाततोजग्मुर्यथागतं। विसर्जयित्वाविप्रांस्तान्राजापिजनमेजयः। त
तस्तक्षशिलायाः सपुनरायाद्गजाह्वयं। एतत्तेसर्वमाख्यातं वैशंपायनकीर्तितं। व्यासाज्ञयासमाख्यातं सर्प
सत्रेनृपस्यहि। पुण्योयमितिहासाख्यः पवित्रंचेदमुत्तमं। कृष्णेन मुनिनाविप्रा निर्मितं सत्यवादिना। सर्वज्ञेन

राम
८

विधिज्ञेन धर्मज्ञानवतासता। अतींद्रियेणशुचिनातपसा भावितात्मना। ऐश्वर्येवर्तताचैव सांख्ययोगवतातथा।
नेकतंत्रविबुद्धेन दृष्ट्वादिव्येनचक्षुषा। कीर्तिंप्रथयतालोके पांडवानां महात्मनां। अन्येषांक्षत्रियाणांच भूरिद्रविणते
जसां। यश्चेदंश्रावयेद्विद्वान्सदापर्वणिपर्वणि। धूतपाप्माजितः स्वर्गो ब्रह्मभूयायगच्छति। यश्चेदंश्रावयेच्छ्राद्धेब्रा
ह्मणान्पादमंततः। अक्षय्यमन्नपानंवैपितृंस्तस्योपतिष्ठते। अह्नायदेनःक्रियतेइंद्रियैर्मनसापिवा। महाभार
तमाख्यायपश्चात्संध्यांप्रमुच्यते। यद्रात्रौकुरुतेपापंब्राह्मणस्त्रीभिरेवतः। महाभारतमाख्यायपूर्वांसंध्यांप्रमु
च्यते। महत्वाद्भारतत्वाच्च महाभारतमुच्यते। निरुक्तमस्ययोवेदसर्वपापैः प्रमुच्यते। धर्मेचार्थेचकामेचमोक्षेचभ
रतर्षभ। यदिहास्तितदन्यत्रयन्नेहास्तिनकुत्रचित्। जयोनामेतिहासोयं श्रोतव्योमोक्षमिच्छता। ब्राह्मणेनच
राज्ञाचगर्भिण्याचैवयोषिता। स्वर्गकामोलभेत्स्वर्गंजयकामोलभेज्जयं। गर्भिणीलभतेपुत्रंकन्यांवाबहुभागि
नीं। अनागतश्चमोक्षश्चकृष्णद्वैपायनः प्रभुः। संदर्भंभारतस्यास्यकृतवान्धर्मकाम्यया। षष्टिंशतसहस्राणिच
कारान्यांससंहितां। त्रिंशच्छतसहस्राणिदेवलोकेप्रतिष्ठिता। पित्र्येपंचदशप्रोक्तं यक्षलोकेचतुर्दश। एकंश
तसहस्रंतुमानुषेषुप्रभाषितं। नारदोश्रावयद्देवानसितोदेवलः पितॄन्। रक्षोयक्षान्शुकोमर्त्यान्वैशंपायन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्व०
९

नएवतु।इतिहासमिमंपुण्यंमहार्थंवेदसंमितं।व्यासोक्तंश्रूयतेयेनकृत्वाब्राह्मणमग्रतः।सनरःसर्वकामांश्चकीर्तिंप्रा
प्येहशौनक।गच्छेत्पारमिकांसिद्धिमत्रमेनास्तिसंशयः।भारताध्ययनात्पुण्यादपिपादमधीयतः।श्रद्धयापरयाभ
क्त्याश्राव्यतेचापियेनतु।यइमांसंहितांपुण्यांपुत्रमध्यापयच्छुकं।मातापितृसहस्राणिपुत्रदारशतानिच।संसा
रेष्वनुभूतानियांतियास्यंतिचापरे।हर्षस्थानसहस्राणिभयस्थानशतानिच।दिवसेदिवसेमूढमाविशंतिन
पंडितं।ऊर्ध्वबाहुर्विरौम्येषनचकश्चिच्छृणोतिमे।धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यते।नजातुकामान्न
भयान्नलोभाद्धर्मंत्यजेज्जीवितस्यापिहेतोः।नित्योधर्मःसुखदुःखेत्वनित्येजीवोनित्योहेतुरस्यत्वनित्यः।इ
मांभारतसावित्रींप्रातरुत्थाययःपठेत्।सभारतफलंप्राप्यपरंब्रह्माधिगच्छति।यथासमुद्रोभगवान्यथा
चहिमवान्गिरिः।ख्यातावुभौरत्ननिधीतथाभारतमुच्यते।इदंभारतमाख्यानंयःपठेत्सुसमाहितः।स
गच्छेत्परमांसिद्धिमत्रमेनास्तिसंशयः।द्वैपायनोष्ठपुटनिःसृतमप्रमेयंपुण्यंपवित्रमथपापहरंशिवंच।
योभारतंसमधिगच्छतिवाच्यमानंकिंतस्यपुष्करजलैरभिषेचनेन।योगोशतंकनकशृंगमयंददाति
विप्रायवेदविदुषेचबहुश्रुताय।पुण्यांचभारतकथांशृणुयाच्चनित्यंतुल्यंफलंभवतितस्यचतस्यचैव।

राम
९

भा०स्व०
१०

॥ ॥इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांस्वर्गारोहणपर्वसमाप्तं॥ ॥शुभमस्तुलेख
कपाठकयोः॥ ॥छ॥ ॥गगनरामरसैकमितेशके१६३०सकलधार्यभिधेशुभहायने॥अथध
वलाश्विनमासितिथौमहागणपतेर्विलिलेखमहामतिः॥१॥श्रीकाशिपुर्याःसुसमागतोहिश्रीतें
इपूरेस्वजनैरुवास॥अनंतनामाघलिखच्चपर्वश्रीभारतस्येहदिवावरोहं॥२॥ ॥छ॥ ॥श्रीः
वंशीविभूषितकरान्नवनीरदाभात्पीतांबरादरुणबिंबफलाधरोष्ठात्॥पूर्णेंदुसुंदरमुखादर
विंदनेत्रात्कृष्णात्परंकिमपितत्वमहंनजाने॥१॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

राम
१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वर्गारोहणपर्व ॥ दत्ता पुत्र विकुपंत स्यराह्णा दत्तं ॥ रतं ॥

इदं पुस्तकं संकराजीपंतस्य ... १०

स्वर्गारोहणपर्वेदं पुस्तकं

॥ शंकरपंडितस्य ॥ श्री १८

१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.07.19 15:41
,TRANSFERRED=2019/07/20 at 15:45:08
,PAGES=12
,TYPE=STD
,NAME=S0001049
,Book Name=M-1996-SWARNROHANPARV
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection